# संस्कृतवार्ता:

**दिनाङ्क :- 02.07.2026**

**प्रात: - 06:55**

**अथ वार्ता:**

**जापान-पीएम**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां स्वीय समकक्षया साने ताकाइची इत्यनया सह वार्षिक-शिखर-सम्मेलन-स्तरीयां वार्तां करिष्यति। शिखर-सम्मेलनमिदं उभाभ्यां पक्षाभ्यां द्वैपाक्षिकसहयोगं समीक्षितुं, सुदृढीकर्तुं सहैव पारस्परिकहिताय क्षेत्रीय-वैश्विक-विषयेषु विचाराणाम् आदानप्रदानकर्तुं च अवसरं प्रदास्यति। द्वयो: प्रधानमन्त्रिणो: मध्ये संवादानन्तरं नैकेषां सन्धिपत्राणाम् आदानप्रदानं भविष्यति।

जापानस्य प्रधानमन्त्री भारतस्य त्रिदिवसीययात्रायै ह्य: सायं नवदिल्ल्यां सम्प्राप्ता। प्रधानमन्त्री ताकाइची इत्येतस्या: इयं भारतस्य प्रथमा आधिकारिकयात्रा वर्तते। विदेशमन्त्रालयेनोक्तं यत् इयं यात्रा भारतजापानयो: मध्ये विशेष-रणनीतिक-वैश्विक-सहमतिम् अग्रे वर्धनदिशि महत्त्वपूर्णा वर्तते। सामाजिकसञ्चारपटले एकस्मिन् सन्देशे श्रीमोदिना लिखितं यत् असौ जापानस्य प्रधानमन्त्रिणा सह व्यापकचर्चाया: आशां करोति, यया भारतजापानयो: विशेष-राणनीतिक-वैश्विकसहमतिं इतोऽपि गहनं भविष्यति।

**अश्विनी वैष्णव**

दिल्ल्यां वसंतकुञ्ज-क्षेत्रस्य नेल्सनमण्डेला-मार्गेण सह द्वारका-द्रुतमार्गं संयोजयन् दिल्ली-नगरे अष्ट चत्वारिशदधिकैकशत ए. ई. राष्ट्रियराजमार्गस्य कृते षट्मार्गीय-सुरङ्गस्य निर्माणाय ह्य: प्रशासनेन अनुमतिः प्रदत्ता। राष्ट्रिय-राजधान्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, उत्तरप्रदेशे राष्ट्रिय-राजमार्गस्य चतुस्त्रिंशत् इत्यस्य सप्तदशांशोत्तर सप्तदशाधिकैकशत कि. मी. सुदीर्घस्य कानपुर-कबराई-खण्डस्य चतुर्मार्गीय-अभिगम-नियन्त्रित-मार्गस्य निर्माणम् अपि प्रशासनेन अनुमोदितम् अस्ति, यत्र संरचनाः षड्मार्गानि यावत् सुलभतया विस्तारयितुं परिकल्पिताः सन्ति।

**जी राम जी-पारिश्रमिक:**

विकसित भारत जी राम जी- अधिनियमस्य-पञ्चविंशत्यधिकद्विसहस्रतमस्य अन्तर्गतं वर्धितानि पारिश्रमिक-मूल्यानि ह्य: आरभ्य समग्र-देशे कार्यान्वितानि। ग्रामीण-विकास-मन्त्रालयेन प्रसारितायाः अधिसूचनायाः अनुसारं, सर्वेषु राज्येषु केन्द्रशासित-प्रदेशेषु च पारिश्रमिक-अनुपातेषु श्लाघनीया वृद्धिः कृता। मन्त्रालयेन प्रोक्तं यत्, प्रथमवारं प्रतिदिनं त्रिशत-रूप्यकाणां कश्चन पारिश्रमिकानुपातः निर्धारितः। अनेन सुनिश्चितं भविष्यति यत् देशस्य कस्मिन्नपि भागे अधिसूचितः न्यूनतम-पारिश्रमिकः अस्मात् स्तरात् अल्पं न भवेत्। ग्रामीण-विकास-मन्त्रालयेन प्रतिपादितं यत् अयं अधिनियमः प्रत्येकं वित्तीयवर्षे पंचविंशत्युत्तरैकशतदिनानां सवेतन-वृत्तेः प्रतिभूतिं प्रदाय ग्रामीण-भारतस्य सशक्तिकरणं विधास्यति।

**दिल्ली**

दिल्ल्या: मुख्यनिर्वाचनिाधिकारिण: कार्यालयेन संसूचितं यत् ह्य: पर्यन्तं राष्ट्रियराजधान्यां द्वात्रिंशत्-सहस्राधिक-गणना-प्रपत्राणां अङ्कीकरणं सम्पूर्णम्। दिल्ल्यां मतदातृसूच्या: विशेषगहनसंशोधनस्य भागरूपेण प्राय: नवनवति-सहस्राधिक नवलक्ष-प्रपत्राणि वितरितानि। सम्प्रति दिल्ल्यां नैर्वाचनिक-गणना-प्रपत्राणां प्रतिगृहं वितरणं प्रचलति।

**दुरंडकप क्रीड़ा**

विश्वस्य प्रमुखा कन्दुक-क्रीडा प्रतियोगिता डूरंड कप इत्यस्य पंचत्रिंशदधिकैकशततमं संस्करणं मासस्यास्य पंचविंशतिदिनाङ्कात् कोलकातायाम् आरप्स्यते।

**।। इति वार्ता:।।**